मुनीन्द्रैः"। केशवोऽपि "लग्ने हीनबली बली षडधिके वीर्य्ये ग्रहश्चोदयः"। "सर्व्व एव खचरा ददतीदं जीवशर्म्मगदितं हि तदायुः। ग्रहः स्वोच्चहीनः स चेत् षड्भहीनो भचक्राद्विशोध्योऽथ भागीकृतः सन्। कुवेदर्त्तुनागै ८६४१ र्हतो वेदखाच्चैः ५०४ र्विभक्तोदिनाद्यम्भवत्येवमायुः" अहोभ्यः खरामै ३० र्हृ तेभ्योऽधिमासाः पतङ्गैश्च तेभ्योभवेयुस्तदाब्दाः। भचक्रार्द्धहान्यादिकोऽन्योविधिर्यः सपिण्डोद्भवायुर्वदेवात्र कार्यः इति। आयुःस्वथैतेषु बलाढ्यलग्ने विहाय राशीन् कृतलिप्तिकोऽत्र भक्तो द्विशत्या २०० फलमब्दपूर्व्वं यत्स्यात् विलग्नायुषि तच्च योज्यम्। लग्नार्कयोरर्कशशाङ्कयोश्च लग्नोडुपत्योरपि वीर्य्यसाम्ये। तदायुषोरैक्यदलं भवेद्यत् तत् श्रीधराद्यैः स्फुटमायुरुक्तम्" इति लग्नायुः। "ये धर्मकर्मनिरता विजितेन्द्रियाये ये पथ्यभोजनजुषोद्विजदेवभक्ताः। लोकोत्तरन्दधति ये कुलशीललीलां तेषामिदङ्गदितमायुरुदारधीभिः"। अष्टवर्गादपि आयुर्दायज्ञानं भवति तच्चाष्टवर्गशब्दे उक्तप्रायम्। ५२२ पृष्ठे दृश्यम् नक्षत्रायुःकेन्द्रायुःप्रभृतीनां विस्तरभयादिहानुक्तिराकरे तच्च दृश्यम्।

**आयुर्द्रव्य** न० आयुःसाधनं द्रव्यम् शा०त०। १औषधे रत्नमा०। २आयुःसाधने घृते च "आयुर्वै घृतमित्युक्तेः घृतस्यायुर्जनकत्वात्तथात्वम्।

**आयुर्योग** पु० उचितस्यायुषोज्ञापकः योगः। ज्योतिषोक्ते ग्रहयोगभेदे सचायुःशब्दे दृश्यः।

**आयुर्वृद्धि** स्त्री आयुषो वृद्धिः। द्रव्यविशेषसेवनेनायुषो वृद्धौ तानि च द्रव्याणि कतिचिदुच्यन्ते। रस एव तावत् सर्व्वापेक्षयायुर्वृद्धिकरः 'अभ्रकं तव वीजन्तु मम वीजन्तु पारदः। अनयोर्मेलनं देवि! मृत्युदारिद्र्यनाशनम्" इति सर्व०द०गौरीं प्रति शिववाक्यम्' कर्मयोगेन देवेशि! प्राप्यते पिण्डधारणम्। रसश्च पवनश्चेति कर्म्मयोगो द्विधा स्मृतः। मूर्च्छितो हरति व्याधीन् मृतो जीवयति स्वयम्। बद्धः खेचरतां कुर्य्याद्रसो वायुश्च भैरवि!" इति सर्व्व०द० तन्त्रवाक्यम्। यथा च वायोर्निरोधेनैव आयुर्वृद्धिः। तथोक्तं काशी० 'संनियम्येन्द्रियग्रामं नातिनीचोच्छ्रितासनः। मध्यमञ्चोत्तमं चाथ प्राणायाममुपक्रमेत्। चलेऽनिले चलं सर्वं निश्चलं तत्र निश्चले। स्थाणुत्वमाप्नुयाद्योगीततोऽनिलनिरोधनात्। यावद्देहे स्थितः प्राणो जीवितं तावदुच्यते। निर्गते तत्र मरणं ततःप्राणं निरोधयेत्। प्राणायामेन युक्तेन सर्व्वव्याधिक्षयोभवेत् अयुक्ताभ्यासयोगेन सर्वव्याधिसमुद्भवः" ततश्च प्राणायामस्य सर्वव्याधिहरत्वादप्यायुर्वृद्धिकरत्वम्। अस्यचायुर्वृद्धिकरत्वेऽन्यदपि कारणम् तथा हि "षष्टिश्वासैर्भवेत् प्राणः षट्प्राणा नाड़िका मता। षष्टिर्नाड्यस्त्वहोरात्रो जपसंख्याक्रमो-मतः। एकविंशतिसाहस्रं षट् शतानि महेश्वरि!। जपति प्रत्यहं प्राणीति" तन्त्रोक्त्या २१६०० एतन्मिताः श्वासरूपाः प्राणक्रियाः अहोरात्रे भवन्ति वत्सरसंख्यया ३६० गुणितास्ताः ७७७६००० एतन्मिता वत्सरे भवन्ति। 'शतायुर्वै पुरुष' इति श्रुत्या मनुष्याणां स्वाभाविकशतायुष्ट्वोक्तेः शतेन गुणितास्ताः ७७७६००००० एतन्मिताः प्राणक्रिया मनुष्याणां जीवनकाले भवितुमर्हन्ति तत्र प्राणायामादिना प्राणवायोर्निरोधे प्राणक्रियानुत्पत्तेः प्राणक्रियारोधकाले च यावत्यः प्राणक्रिया भवितुमर्हन्ति तावन्तःकाला आयुषो वर्द्धन्ते इति। उक्ताः प्राणक्रियाश्च सुस्थस्यैव भवन्ति रोगाद्युपसर्गे शीघ्रधावनादिपरिश्रमे च प्राणक्रियाधिक्यं भवति तेन स्वल्पकालमध्ये यावत्प्राणक्रिया अपेक्षितास्ततोन्यूनकालमध्ये तासामुत्पत्तावायुःक्षयः। शतायुष्ट्वञ्च स्वाभाविकं कर्म्मवशात् ततोन्यूनताऽपि जात्यायुर्भोगानां कर्म्मविपाकत्वस्य योगशास्त्रे उक्तेः। तादृशाल्पायुष्ट्वादिसूचको ग्रहविशेषयोगादिर्ज्योतिषे उक्तः। अन्नदोषादीनाञ्चाल्पायुष्ट्वप्रयोजकत्वं स्मृत्युक्तमदृष्टद्वारैव। वैद्यकोक्तापथ्यभोजनस्य तथात्वञ्च रोगोत्पत्तिद्वारेति भेदः। रोगोपसृष्टदेहं च जीवो दुःखहेतुत्वात् वह्न्याद्युपद्रुतदेशवत् शीघ्रं परिजिहीर्षति। तथा च देहो यथा न रोगादिभिरुपसृज्येत" तथा यतितव्यमित्येतदर्थं शास्त्रेषु पथ्योपदेशः इति बोध्यम्। एवं खेचरीमुद्रादीनामप्यायुर्वृद्धिकरत्वम् काशी० उक्तम्। "कपालकुहरे जिह्वा प्रविष्टा विपरीतगा। भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी। न पीड्यते स रोगेण न च लिप्येत कर्म्मणा। बाध्यते न स कालेन योमुद्रां वेत्ति खेचरीम्। चित्तं चरति खे यस्माज्जिह्वा चरति खे गता। तेनैषा खेचरी नाम मुद्रा सिद्धैर्निषेविता। यावद्बिन्दुः स्थिरोदेहे तावन्मृत्युभयं कुतः। यावद्बद्धा नभोमुद्रा तावद्बिन्दुर्न गच्छति। उड्डीनं कुरुते यस्मादहोरात्रं महाखगः। उड्डीयानं ततः प्रोक्तं तत्र बन्धोऽभिधीयते। जठरे पश्चिमं जानु नाभेरूर्द्ध्वञ्च धारयेत्। उड्डीयानं ह्ययं बन्धोमृत्योरपि भयं जयेत्। बध्नाति हि शिराजालं अधोगामि न भोजनम्। एष जालन्धरोबन्धः कण्ठे दुःखौघनाशनः। जलन्धरे कृते बन्धे कण्ठसंकोचलक्षणे।